# Shri Nrisimhapanjaramantrah

# શ્રીનૃસિંહપઞ્જરમન્ત્રઃ

## Document Information

Text title : Shri Nrisimhapanjaramantrah

File name : nRRisiMhapanjaramantraH.itx

Category : vishhnu, dashAvatAra, mantra, panjara, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 4, 2025

*sanskritdocuments.org*

# શ્રીનૃસિંહપઞ્જરમન્ત્રઃ

શ્રીગણેશાય નમઃ । શ્રીમદ્દિવ્યલક્ષ્મીનૃસિંહાય નમઃ ।
અથ નૃસિંહપઞ્જરપ્રારમ્ભઃ ।
બ્રહ્મોવાચ-
અનેકમન્ત્રકોટીશં નૃસિંહધ્યાનમુચ્ચરેત્ ।
અન્યોઽપિ વિવિધાં રક્ષાં વિષરોગાદિનિવારણમ્ ॥ ૧॥

સર્વરક્ષાકરં નૃણાં સર્વોપદ્રવનાશનમ્ ।
સર્વ શાન્તિકરં ગેહે પઞ્જરં વજ્રસમ્મિતમ્ ॥ ૨॥

ૐ અસ્ય શ્રીનૃસિંહપઞ્જરસ્તોત્રમન્ત્રસ્ય । બ્રહ્માઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । શ્રીલક્ષ્મીનૃસિંહો દેવતા ।
ૐ ક્ષ્રૌં બીજમ્ । રૌં શક્તિઃ । ઐં કીલકમ્ ।
મમ સર્વદેવાનાં ચોરપન્નગવ્યાઘ્રવૃશ્ચિકભૂતપ્રેતપિશાચ-
શાકિનીડાકિનીયન્ત્રમન્ત્રાનેક નિવારણાર્થે વજ્રપઞ્જરરક્ષાબન્ધને વિનિયોગઃ ॥

અથ ન્યાસઃ ।
ૐ ક્ષ્રૌં અઙ્ગુષ્ઠાભ્યાં નમઃ । હૃદયાય નમઃ ।
ૐ પ્રૌં તર્જનીભ્યાં નમઃ । શિરસે સ્વાહા ।
ૐ રૌં મધ્યમાભ્યાં નમઃ । શિખાયૈ વષટ્ ।
ૐ વ્રૌં અનામિકાભ્યાં નમઃ । કવચાય હુમ્ ।
ૐ જ્રૌં કનિષ્ઠિકાભ્યાં નમઃ । નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રૌં કરતલકરપૃષ્ઠાભ્યાં નમઃ । અસ્ત્રાય ફટ્ ।
ૐ હ્રીં સહસ્રાર હું ફટ્ ઇતિ સુદર્શનેન દિગ્બન્ધઃ ।
અથ ધ્યાનમ્ ।
ધ્યાયેન્નૃસિંહમુરુવૃત્તરવિત્રિનેત્રં
જાનુપ્રસક્તકરયુગ્મમથાપરાભ્યામ્ ।
ચક્રં દરં ચ દધતં પ્રિયયાસમેતં

તિગ્માંશુકોટ્યધિકતેજસમર્થ્યશુક્તિમ્ ॥ ૧॥

ઇતિ ધ્યાત્વાપિ દેવેશં શુચિર્ભૂત્વા સમાહિતઃ ।
દેવાગારેચ વૃન્દાયાં પઞ્જરં પ્રજપેત્સુધીઃ ॥ ૨॥

ૐ ઉગ્રં હું ફટ્ મૂલાધારે રક્ષ રક્ષ સ્વાહા ।
ૐ વીરં હું ફટ્ ગુહ્યસ્થાને રક્ષ રક્ષ સ્વાહા ।
ૐ મહાવિષ્ણું હું ફટ્ નાભ્યાં રક્ષ રક્ષ સ્વાહા ।
ૐ જ્વલન્તં હું ફટ્ હૃદયે રક્ષ રક્ષ સ્વાહા ।
ૐ સર્વતોમુખં હું ફટ્ કણ્ઠં રક્ષ રક્ષ સ્વાહા ।
ૐ નૃસિંહં હું ફટ્ ભ્રુવોર્મધ્યે રક્ષ રક્ષ સ્વાહા ।
ૐ ભીષણં હું ફટ્ નેત્રયોઃ રક્ષ રક્ષ સ્વાહા ।
ૐ ભદ્રં હું ફટ્ લલાટે રક્ષ રક્ષ સ્વાહા ।
ૐ મૃત્યું હું ફટ્ બ્રહ્મરન્ધ્રે રક્ષ રક્ષ સ્વાહા ।
ૐ નમામિ હું ફટ્ શિરસિ રક્ષ રક્ષ સ્વાહા ।
ૐ અહં હું ફટ્ શિખાયાં રક્ષ રક્ષ સ્વાહા ।
ૐ ક્ષ્રૌં ઉગ્રં વીરં મહાવિષ્ણું જ્વલન્તં સર્વતોમુખમ્ ।
નૃસિંહં ભીષણં ભદ્રં મૃત્યુમૃત્યું નમામ્યહમ્ ।
હું ફટ્ સર્વાઙ્ગે રક્ષ રક્ષ સ્વાહા ।
સર્વવ્યાપકત્રયં કુર્યાત્ ।
અથ નવનારસિંહમન્ત્રેણ દિશારક્ષણમન્ત્રઃ ।
ૐ ક્ષ્રૌં પ્રૌં રૌં વ્રૌં જ્રૌં હ્રૌં નમઃ ૐ લાં હું ફટ્ પૂર્વદિશં સ્તમ્ભનારસિંહાય રક્ષ રક્ષ સ્વાહા ॥ ૧॥

ૐ નમો નારસિંહાય સર્વદુષ્ટવિનાશનાય સર્વજનમોહનાય સર્વરાજ્યવશ્યં કુરુ કુરુ હું ફટ્ આગ્નેયીં દિશં દિવ્યનૃસિંહાય રક્ષ રક્ષ સ્વાહા ॥ ૨॥

ૐ નમો સિંહાય સિંહરાજાય નરકેશાય નમઃ । ૐ હું ફટ્ વીરનૃસિંહાય યામ્યાં દિશં રક્ષ રક્ષ સ્વાહા ॥ ૩॥

ૐ ક્રૌં ૐ ૐ જ્વાલાદંષ્ટ્રાય કરાલવદનાય ૐ ઉગ્રાય ઉગ્રવીર્યાય વિકટાય વજ્રદેહાય રુદ્રાય રુદ્રઘોરાય ભદ્રાય ભદ્રકારિણે નમઃ હું ફટ્ કાલનૃસિંહાય નૈરૃતિં દિશં રક્ષ રક્ષ સ્વાહા ॥ ૪॥

ૐ જ્રી હ્રીં નમઃ સ્વાહા હું ફટ્ વિક્રમનૃસિંહાય વારૂણીં દિશં રક્ષ રક્ષ સ્વાહા ।
ૐ નમો નૃસિંહાય કપિલજટાય અમોઘવાચાય સત્યં સત્યં મહોગ્રચણ્ડરૂપાય હું ફટ્ પ્રચણ્ડવાયુવેગનૃસિંહાય વાયવીં દિશં રક્ષ રક્ષ સ્વાહા ।
ૐ હ્રીં હ્રીં હ્રીં ૐ હૂં હૂં હૂં ક્ષ્રૌં ક્ષ્રીં ક્ષ્રૂં ક્ષ્રૌં ક્ષ્રૌં ક્ષ્રઃ ક્ષ્રૂં ક્ષ્રૂં હું ફટ્ કૌબેરીં દિશં માયાનૃસિંહાય રક્ષ રક્ષ સ્વાહા ।

ૐ ૐ ૐ હ્રીં હ્રીં હ્રીં હૂં હૂં હૂં છ્રં છ્રં છ્રં છ્રં છ્રં હું ફટ્ વીરોગ્રનૃસિંહાય ઈશાનીં દિશં રક્ષ રક્ષ સ્વાહા । ૐ રુંક્ષું ૐ રુંક્ષું રુંક્ષું રુંક્ષું ૐ રું રું હું ફટ્ કેદારાકાશકરાલનૃસિંહાય આકાશદિશં રક્ષ રક્ષ સ્વાહા ।

ૐ ક્ષ્રૌં શ્રીં હ્રીં હું ફટ્ લક્ષ્મીનૃસિંહાય પાતાલદિશં રક્ષ રક્ષ સ્વાહા ।

ૐ જાં જાં જાં હ્રાં હ્રાં હ્રાં હું ફટ્ મહોગ્રનારસિંહાય સર્વદિશં રક્ષ રક્ષ સ્વાહા ।

ૐ હું પ્લું ફટ્ સર્વાઙ્ગં મમ રક્ષ રક્ષ સ્વાહા ।

અથ મન્ત્રઃ ।

ૐ સર્વરોગાણાં બન્ધ બન્ધ સર્વગ્રહાણાં બન્ધ બન્ધ સર્વદોષાણાં બન્ધ બન્ધ સર્વચોરાણાં બન્ધ બન્ધ સર્વપન્નગાનાં બન્ધ બન્ધ સર્વવ્યાઘ્રાણાં બન્ધ બન્ધ સર્વ વૃશ્ચિકાનાં બન્ધ બન્ધ સર્વભૂતપ્રેતપિશાચકાનાં બન્ધ બન્ધ શાકિની ડાકિની યન્ત્ર મન્ત્ર બઙ્ધ બન્ધ કીલય કીલય મર્દય મર્દય ચૂર્ણય ચૂર્ણય જય જય મમ વિરોધિનઃ હન હન મથ મથ પચ પચ ચૂર્ણય ચૂર્ણય ચક્રેણ ગદયા વજ્રેણ ભસ્મીકુરુ ભસ્મીકુરુ । ૐ જ્રીં જ્રીં ત્રીં ત્રીં હ્રીં હ્રીં ક્ષ્રીં ક્ષ્રીં નૃસિંહાય નમઃ । હું ફટ્ રક્ષ રક્ષ સ્વાહા । ૐ મહોગ્રનારસિંહાય સર્વદિશં રક્ષ રક્ષ સ્વાહા । ૐ ક્ષ્રૌં નૃસિંહાય વિદ્મહે વજ્રનખાય ધીમહી તન્નઃ સિંહઃ પ્રચોદયાત્ । હૃદયરક્ષાર્થં દ્વાદશવારં જપેત્ ॥

ૐ હ્રીં સહસ્રજ્વાલાવર્તસહસ્રાર હું ફટ્ સ્વાહા સ્વાહા સ્વાહા । છોટિકાત્રયમ્ ।

ય ઇદં પઞ્જરં દિવ્યં સર્વરક્ષાકરં પરમ્ ।
સર્વરોગપ્રશમનં સર્વદારિદ્ર્યનાશનમ્ ॥ ૧॥

લક્ષ્મી પુષ્ટિકરં ગેહે પઞ્જરં વજ્રપઞ્જરમ્ ।
સર્વશાન્તિકરં નૃણાં પુત્રપૌત્રવિવર્ધનમ્ ॥ ૨॥

એકધા પઠણાદ્દેવિ સર્વપાપક્ષયોભવેત્ ।
દશધા પઠણાન્મન્ત્રી રણે યુદ્ધજયીભવેત્ ॥ ૩॥

સહસ્રં યઃ પઠેદ્યસ્તુ ખેચરો જાયતે નરઃ ।
સહસ્રદશકં યસ્તુ પઠેદ્દૈભક્તિમાન્નરઃ ॥ ૪॥

સ ચાસ્ય જગતાં નાથો પ્રત્યક્ષો ભવતિ ધ્રુવમ્ ।
લક્ષપૂર્ણં યદા દેવી પઞ્જરં પ્રજપેત્સુધીઃ ॥ ૫॥

ભવપાશવિનિર્મુક્તો દેવતુલ્યો ન સંશયઃ ।
નૃસિંહમન્ત્રરક્ષાણાં સર્વસિદ્ધિફલપ્રદમ્ ॥ ૬॥

ભૂર્જપત્રે લિખિત્વા તુ શિરસા ધારયેત્સુધીઃ ।
શસ્ત્રઘાતાન્ન બાધ્યન્તે સઙ્ગ્રામે શત્રુસઙ્કટે ॥ ૭॥

ઇદં તુ પઞ્જરં દિવ્યં સર્વમન્ત્રમયં શુભમ્ ।
સર્વરક્ષાકરં નૃણાં દેવદેવાભિવન્દિતમ્ ॥ ૮॥

મન્ત્રવેત્તા ગુરું ગત્વા ગૃહણીયપ્રયત્નતઃ ।
અન્યથા ગ્રહણે તસ્ય મૃત્યુદ્વારં ન સંશયઃ ॥ ૯॥

પઠનેન પિશાચત્વં વિના ગુરૂપદેશતઃ ।
તસ્માત્પ્રયત્નોઽપિ ચતુરો ગુરું મન્ત્રવિદાં વરમ્ ।
અનુગચ્છન્ ગૃહીતવ્યમિદં પઞ્જરમાશુવત્ ॥ ૧૦॥

અનુજ્ઞાં દેહિ ।

ઇત્યથર્વણરહસ્યે બ્રહ્માસાવિત્રીસંવાદે શ્રીનૃસિંહપઞ્જરસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by M K Barman

*Shri Nrisimhapanjaramantrah*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*